# Panchavarana Shiva Mahastotram

उपमन्युरुवाच

स्तोत्रं वक्ष्यामि ते कृष्ण पञ्चावरणमार्गतः ।
योगेश्वरमिदं पुण्यं कर्म येन समाप्यते ॥

जय जय जगदेकनाथ शम्भो
प्रकृतिमनोहर नित्यचित्स्वभाव ।
अतिगतकलुषप्रपञ्चवाचा-
मपि मनसां पदवीमतीततत्त्वम् ॥
स्वभावनिर्मलाभोग जय सुन्दरचेष्टित ।
स्वात्मतुल्यमहाशक्ते जय शुद्धगुणार्णव ॥
अनन्तकान्तिसम्पन्न जयासदृशविग्रह ।
अतर्क्यमहिमाधार जयानाकुलमङ्गल ॥
निरञ्जन निराधार जय निष्कारणोदय ।
निरन्तरपरानन्द जय निर्वृतिकारण ॥
जयातिपरमैश्वर्य जयातिकरुणास्पद ।
जय स्वतन्त्रसर्वस्व जयासदृशवैभव ॥
जयावृतमहाविश्व जयानावृतकेनचित् ।
जयोत्तर समस्तस्य जयात्यन्तनिरुत्तर ॥

जयाद्भुत जयाक्षुद्र जयाक्षत जयाव्यय।
जयामेय जयामाय जयाभाव जयामल॥
महाभुज महासार महागुण महाकथ।
महाबल महामाय महारस महारथ॥
नमः परमदेवाय नमः परमहेतवे।
नमः शिवाय शान्ताय नमः शिवतराय ते॥
त्वदधीनमिदं कृत्स्नं जगद्धि ससुरासुरम्।
अतस्त्वद्विहितामाज्ञां क्षमते कोऽतिवर्तितुम्॥
अयं पुनर्जनो नित्यं भवदेकसमाश्रयः।
भवानतोऽनुगृह्यास्मै प्रार्थितं संप्रयच्छतु॥

जयाम्बिके जगन्मातर्जय सर्वजगन्मयि।
जयानवधिकैश्वर्ये जयानुपमविग्रहे॥
जय वाङ्मनसातीते जयाचिद्ध्वान्तभञ्जिके।
जय जन्मजराहीने जय कालोत्तरोत्तरे॥
जयानेकविधानस्थे जय विश्वेश्वरप्रिये।
जय विश्वसुराराध्ये जय विश्वविजृंभिणि॥
जय मङ्गलदिव्याङ्गि जय मङ्गलदीपिके।
जय मङ्गलचारित्रे जय मङ्गलदायिनि॥
नमः परमकल्याणगुणसञ्चयमूर्तये।
त्वत्तः खलु समुत्पन्नं जगत्वय्येव लीयते॥

त्वद्विनातः फलं दातुमीश्वरोऽपि न शक्नुयात् ।
जन्मप्रभृति देवेशि जनोयं त्वदुपाश्रितः ।
अतोऽस्य तव भक्तस्य निर्वर्तय मनोरथम् ॥

पञ्चवक्त्रो दशभुजः शुद्धस्फटिकसन्निभः ।
वर्णब्रह्मकलादेहो देवः सकलनिष्कलः ॥
शिवभक्तिसमारूढः शान्त्यतीतः सदाशिवः ।
भक्त्या मयार्चितो मह्यं प्रार्थितं शं प्रयच्छतु ॥

सदाशिवाङ्कमारूढा शक्तिरिच्छा शिवाह्वया ।
जननी सर्वलोकानां प्रयच्छतु मनोरथम् ॥

शिवयोर्दयितौ पुत्रौ देवौ हेरम्बषण्मुखौ ।
शिवानुभावौ सर्वज्ञौ शिवज्ञानामृताशिनौ ॥
तृप्तौ परस्परं स्निग्धौ शिवाभ्यां नित्यसत्कृतौ ।
सत्कृतौ च सदा देवौ ब्रह्माद्यैस्त्रिदशैरपि ॥
सर्वलोकपरित्राणं कर्तुमभ्युदितौ सदा ।
स्वेच्छावतारं कुर्वन्तौ स्वांशभेदैरनेकशः ॥
ताविमौ शिवयोः पार्श्वे नित्यमित्थं मयार्चितौ ।
तयोराज्ञां पुरस्कृत्य प्रार्थितं मे प्रयच्छताम् ॥

शुद्धस्फटिकसङ्काशमीशानाख्यं सदाशिवम् ।

मूर्धाभिमानिनी मूर्तिः शिवस्य परमात्मनः ॥
शिवार्चनरतं शान्तं शान्त्यतीतं खमास्थितम् ।
पञ्चाक्षरान्तिमं बीजं कलाभिः पञ्चभिर्युतम् ॥
प्रथमावरणे पूर्वं शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्चतु ॥

बालसूर्यप्रतीकाशं पुरुषाख्यं पुरातनम् ।
पूर्ववक्त्राभिमानं च शिवस्य परमेष्ठिनः ॥
शान्त्यात्मकं मरुत्संस्थं शम्भोः पादार्चने रतम् ।
प्रथमं शिवबीजेषु कलासु च चतुष्कलम् ॥
पूर्वभागे मया भक्त्या शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥

अञ्जनाद्रिप्रतीकाशमघोरं घोरविग्रहम् ।
देवस्य दक्षिणं वक्त्रं देवदेवपदार्चकम् ॥
विद्यापादं समारूढं वह्निमण्डलमध्यगम् ।
द्वितीयं शिवबीजेषु कलास्वष्टकलान्वितम् ॥
शम्भोर्दक्षिणदिग्भागे शक्त्या सह समर्चितम् ।
पवित्रं मध्यमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥

कुङ्कुमक्षोदसङ्काशं वामाख्यं वरवेषधृक् ।

वक्त्रमुत्तरमीशस्य प्रतिष्ठायां प्रतिष्ठितम् ॥
वारिमण्डलमध्यस्थं महादेवार्चने रतम् ।
तुरीयं शिवबीजेषु त्रयोदशकलान्वितम् ॥
देवस्योत्तरदिग्भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥

शङ्खकुन्देन्दुधवलं सद्याख्यं सौम्यलक्षणम् ।
शिवस्य पश्चिमं वक्त्रं शिवपादार्चने रतम् ॥
निवृत्तिपदनिष्ठं च पृथिव्यां समवस्थितम् ।
तृतीयं शिवबीजेषु कलाभिश्चाष्टभिर्युतम् ॥
देवस्य पश्चिमे भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥

शिवस्य तु शिवायाश्च हृन्मूर्ती शिवभाविते ।
तयोराज्ञां पुरस्कृत्य ते मे कामं प्रयच्छताम् ॥
शिवस्य तु शिवायाश्च शिखामूर्ती शिवाश्रिते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥
शिवस्य तु शिवायाश्च वर्मणा शिवभाविते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥
शिवस्य तु शिवायाश्च नेत्रमूर्ती शिवाश्रिते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥

अस्त्रमूर्ती च शिवयोर्नित्यमर्चनतत्परे।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्॥

वामो ज्येष्ठस्तथा रुद्रः कालो विकरणस्तथा।
बलो विकरणश्चैव बलप्रमथनः परः॥
सर्वभूतस्य दमनस्तादृशाश्चाष्ट शक्तयः।
प्रार्थितं मे प्रयच्छन्तु शिवयोरेव शासनात्॥

अथानन्तश्च सूक्ष्मश्च शिवश्चाप्येकनेत्रकः।
एकरुद्राख्यमूर्तिश्च श्रीकण्ठश्च शिखण्डकः॥
तथाष्टौ शक्तयस्तेषां द्वितीयावरणेऽर्चिताः।
ते मे कामं प्रयच्छन्तु शिवयोरेव शासनात्॥

भवाद्या मूर्तयश्चाष्टौ तासामपि च शक्तयः।
महादेवादयश्चान्ये तथैकादशमूर्तयः॥
शक्तिभिस्सहितास्सर्वे तृतीयावरणे स्थिताः।
सत्कृत्य शिवयोराज्ञां दिशेत फलमीप्सितम्॥

वृषराजो महातेजा महामेघसमन्वनः।
मेरुमन्दारकैलासहिमाद्रिशिखरोपमः॥
सिताभ्रशिखराकारः ककुदा परिशोभितः।
महाभोगीन्द्रकल्पेन वालेन च विराजितः॥

रक्तास्यशृङ्गचरणो रक्तप्रायविलोचनः ।
पीवरोन्नतसर्वाङ्गः सुचारुगमनोज्ज्वलः ॥
प्रशस्तलक्षणः श्रीमान् प्रज्वलन्मणिभूषणः ।
शिवप्रियः शिवासक्तः शिवयोर्ध्वजवाहनः ॥
तथा तच्चरणन्यासपावितापरविग्रहः ।
गोराजपुरुषः श्रीमान् श्रीमच्छूलवरायुधः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥

नन्दीश्वरो महातेजा नगेन्द्रतनयात्मजः ।
सनारायणकैर्देवैर्नित्यमभ्यर्च्य वन्दितः ॥
शर्वस्यान्तःपुरद्वारि सार्धं परिजनैः स्थितः ।
सर्वेश्वरसमप्रख्यः सर्वासुरविमर्दनः ॥
सर्वेषां शिवधर्माणामध्यक्षत्वेऽभिषेचितः ।
शिवप्रियः शिवासक्तः श्रीमच्छूलवरायुधः ॥
शिवाश्रितेषु संसक्तस्त्वनुरक्तश्च तैरपि ।
सत्कृत्य शिवयोराज्ञां स मे कामं प्रयच्छतु ॥

महाकालो महाबाहुर्महादेव इवापरः ।
महादेवाश्रितानां तु नित्यमेवाभिरक्षतु ॥
शिवप्रियः शिवासक्तः शिवयोरर्चकः सदा ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम् ॥

सर्वशास्त्रार्थतत्त्वज्ञः शास्ता विष्णोः परा तनुः।
महामोहात्मतनयो मधुमांसासवप्रियः।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु॥

ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा।
वाराही चैव माहेन्द्री चामुण्डा चण्डविक्रमा॥
एता वै मातरस्सप्त सर्वलोकस्य मातरः।
प्रार्थितं मे प्रयच्छन्तु परमेश्वरशासनात्॥

मत्तमातङ्गवदनो गङ्गोमाशङ्करात्मजः।
आकाशदेहो दिग्बाहुः सोमसूर्याग्निलोचनः॥
ऐरावतादिभिर्दिव्यैः दिग्गजैर्नित्यमर्चितः।
शिवज्ञानमदोद्भिन्नस्त्रिदशानामविघ्नकृत्॥
विघ्नकृच्चासुरादीनां विघ्नेशः शिवभावितः।
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम्॥

षण्मुखः शिवसम्भूतः शक्तिवज्रधरः प्रभुः।
अग्नेश्च तनयो देवो ह्यपर्णातनयः पुनः॥
गङ्गायाश्च गणाम्बायाः कृत्तिकानां तथैव च।
विशाखेन च शाखेन नैगमेयेन चावृतः॥
इन्द्रजिच्चन्द्रसेनानीस्तारकासुरजित् तथा।

शैलानां मेरुमुख्यानां वेधकश्च स्वतेजसा ॥
तप्तचामीकरप्रख्यः शतपत्रदलेक्षणः ।
कुमारस्तु कुमाराणां रूपोदाहरणं महत् ॥
शिवप्रियः शिवासक्तः शिवपादार्चकः सदा ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम् ॥

ज्येष्ठा वरिष्ठा वरदा शिवयोर्यजने रता ।
तयोराज्ञां पुरस्कृत्य सा मे दिशतु काङ्क्षितम् ॥

त्रैलोक्यवन्दिता साक्षादुल्काकारा गणाम्बिका ।
जगत्सृष्टिविवृद्ध्यर्थं ब्रह्मणाभ्यर्थिता शिवात् ॥
शिवायाः प्रविभक्ताया भ्रुवोरन्तरनिस्सृताः ।
दाक्षायणी सती मेना तथा हैमवती ह्युमा ॥
कौशिक्याश्चैव जननी भद्रकाल्यास्तथैव च ।
अपर्णायाश्च जननी पाटलायास्तथैव च ॥
शिवार्चनरता नित्यं रुद्राणी रुद्रवल्लभा ।
सत्कृत्य शिवयोराज्ञां सा मे दिशतु काङ्क्षितम् ॥

चण्डः सर्वगणेशानः शम्भोर्वदनसम्भवः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु काङ्क्षितम् ॥

पिङ्गलो गणपः श्रीमान् शिवासक्तः शिवप्रियः ।

आज्ञया शिवयोरेव स मे कामं प्रयच्छतु ॥

भृङ्गीशो नाम गणपः शिवाराधनतत्परः ।
प्रयच्छतु स मे कामं पत्युराज्ञापुरस्सरम् ॥

वीरभद्रो महातेजा हिमकुन्देन्दुसन्निभः ।
भद्रकालीप्रियो नित्यं मातॄणां चाऽभिरक्षितः ॥
यज्ञस्य च शिरोहर्ता दक्षस्य च दुरात्मनः ।
उपेन्द्रेन्द्रयमादीनां देवानामङ्गतक्षकः ॥
शिवस्यानुचरः श्रीमान् शिवशासनपालकः ।
शिवयोः शासनादेव स मे दिशतु काङ्क्षितम् ॥

सरस्वती महेशस्य वाक्सरोजसमुद्भवा ।
शिवयोः पूजने सक्ता सा मे दिशतु काङ्क्षितम् ॥

विष्णोर्वक्षस्थिता लक्ष्मीः शिवयोः पूजने रता ।
शिवयोः शासनादेव सा मे दिशतु काङ्क्षितम् ॥

महामोटी महादेव्याः पादपूजापरायणा ।
तस्या एव नियोगेन सा मे दिशतु काङ्क्षितम् ॥

कौशिकी सिंहमारूढा पार्वत्याः परमा सुता ।

विष्णोर्निद्रा महामाया महामहिषमर्दिनी ॥
निशुम्भशुम्भसंहर्त्री मधुमांसासवप्रिया ।
सत्कृत्य शासनं मातुः सा मे दिशतु काङ्क्षितम् ॥

रुद्रा रुद्रसमप्रख्याः प्रमथाः प्रथितौजसः ।
भूताख्याश्च महावीर्या महादेवसमप्रभाः ॥
नित्यमुक्ता निरुपमा निर्द्वन्द्वा निरुपप्लवाः ।
सशक्तयः सानुचराः सर्वलोकनमस्कृताः ॥
सर्वेषामेव लोकानां सृष्टिसंहरणक्षमाः ।
परस्परानुरक्ताश्च परस्परमनुव्रताः ॥
परस्परमतिस्निग्धाः परस्परनमस्कृताः ।
शिवप्रियतमा नित्यं शिवलक्षणलक्षिताः ॥
सौम्याधारास्तथा मिश्राश्चान्तरालद्वयात्मिकाः ।
विरूपाश्च सुरूपाश्च नानारूपधरास्तथा ।
सत्कृत्य शिवयोराज्ञां ते मे कामं दिशन्तु वै ॥

देव्याः प्रियसखीवर्गो देवीलक्षणलक्षितः ।
सहितो रुद्रकन्याभिः शक्तिभिश्चाप्यनेकशः ॥
तृतीयावरणे शम्भोर्भक्त्या नित्यं समर्चितः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥

दिवाकरो महेशस्य मूर्तिर्दीप्तसुमण्डलः ।
निर्गुणो गुणसङ्कीर्णस्तथैव गुणकेवलः ॥
अविकारात्मकश्चाद्य एकस्सामान्यविक्रियः ।
असाधारणकर्मा च सृष्टिस्थितिलयक्रमात् ॥
एवं त्रिधा चतुर्धा च विभक्तः पञ्चधा पुनः ।
चतुर्थावरणे शम्भोः पूजितश्चानुगैः सह ॥
शिवप्रियः शिवासक्तः शिवपादार्चने रतः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥

दिवाकरषडङ्गानि दीप्ताद्याश्चाष्टशक्तयः ।
आदित्यो भास्करो भानू रविश्चेत्यनुपूर्वशः ॥
अर्को ब्रह्मा तथा रुद्रो विष्णुश्चादित्यमूर्तयः ।
विस्तरा सुतरा बोधिन्याप्यायिन्यपरा पुनः ॥
उषा प्रभा तथा प्राज्ञा सन्ध्या चेत्यपि शक्तयः ।
सोमादिकेतुपर्यन्ता ग्रहाश्च शिवभाविताः ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥

अथवा द्वादशादित्यास्तथा द्वादश शक्तयः ।
ऋषयो देवगन्धर्वाः पन्नगाप्सरसां गणाः ॥
ग्रामण्यश्च तथा यक्षा रक्षसाश्चासुरास्तथा ।
सप्तसप्तगणाश्चैते सप्तच्छन्दोमया हयाः ॥

वालिखिल्यादयश्चैव सर्वे शिवपदार्चकाः ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥

ब्रह्माऽथ देवदेवस्य मूर्तिर्भूमण्डलाधिपः ।
चतुःषष्टिगुणैश्वर्यो बुद्धितत्त्वे प्रतिष्ठितः ॥
निर्गुणो गुणसङ्कीर्णस्तथैव गुणकेवलः ।
अविकारात्मको देवस्ततस्साधारणः पुरः ॥
असाधारणकर्मा च सृष्टिस्थितिलयक्रमात् ।
एवं त्रिधा चतुर्धा च विभक्तः पञ्चधा पुनः ॥
चतुर्थावरणे शम्भोः पूजितश्च सहानुगः ।
शिवप्रियः शिवासक्तः शिवपादार्चने रतः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥

हिरण्यगर्भो लोकेशो विराट् कालश्च पूरुषः ।
सनत्कुमारः सनकः सनन्दश्च सनातनः ॥
प्रजानां पतयश्चैव दक्षाद्या ब्रह्मसूनवः ।
एकादशसपत्नीका धर्मसङ्कल्प एव च ॥
शिवार्चनरताश्चैते शिवभक्तिपरायणाः ।
शिवाज्ञावशगाः सर्वे दिशन्तु मम मङ्गलम् ॥

चत्वारश्च तथा वेदाः सेतिहासपुराणकाः ।

धर्मशास्त्राणि विद्याभिर्वैदिकीभिः समन्विताः ॥
परस्परविरुद्धार्थाः शिवप्रकृतिपादकाः ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥

अथ रुद्रो महादेवः शम्भोर्मूर्तिर्गरीयसी ।
वाह्नेयमण्डलाधीशः पौरुषैश्वर्यवान् प्रभुः ॥
शिवाभिमानसम्पन्नो निर्गुणस्त्रिगुणात्मकः ।
केवलं सात्त्विकश्चापि राजसश्चैव तामसः ॥
अविकाररतः पूर्वं ततस्तु समविक्रियः ।
असाधारणकर्मा च सृष्ट्यादिकरणात् पृथक् ॥
ब्रह्मणोऽपि शिरच्छेत्ता जनकस्तस्य तत्सुतः ।
जनकस्तनयश्चापि विष्णोरपि नियामकः ॥
बोधकश्च तयोर्नित्यमनुग्रहकरः प्रभुः ।
अण्डस्यान्तर्बहिर्वर्ती रुद्रो लोकद्वयाधिपः ॥
शिवप्रियः शिवासक्तः शिवपादार्चने रतः ।
शिवस्याज्ञां पुरस्कृत्य स मे दिशतु मङ्गलम् ॥

तस्य ब्रह्म षडङ्गानि विद्येशान्तं तथाष्टकम् ।
चत्वारो मूर्तिभेदाश्च शिवपूर्वाः शिवार्चकाः ॥
शिवो भवो हरश्चैव मृडश्चैव तथाऽपरः ।
शिवस्याज्ञां पुरस्कृत्य मङ्गलं प्रदिशन्तु मे ॥

अथ विष्णुर्महेशस्य शिवस्यैव परा तनुः ।
वारितत्त्वाधिपः साक्षादव्यक्तपदसंस्थितः ॥
निर्गुणः तत्त्वबहुलस्तथैव गुणकेवलः ।
अविकाराभिमानी च त्रिसाधारणविक्रियः ॥
असाधारणकर्मा च सृष्ट्यादिकाराणात् पृथक् ।
दक्षिणाङ्गभवेनापि स्पर्धमानः स्वयम्भुवा ॥
आद्येन ब्रह्मणा साक्षात् सृष्टः स्रष्टा च तस्य तु ।
अण्डस्यान्तर्बहिर्वर्ती विष्णुर्लोकद्वयाधिपः ॥
असुरान्तकरश्चक्री शक्रस्यापि तथाऽनुजः ।
प्रादुर्भूतश्च दशधा भृगुशापाच्छलादिह ॥
भूभारनिग्रहार्थाय स्वेच्छयाऽवातरत् क्षितौ ।
अप्रमेयबलो मायी मायया मोहयज्जगत् ॥
मूर्तिं कृत्वा महाविष्णुं सदाविष्णुमथापि वा ।
वैष्णवैः पूजितो नित्यं मूर्तित्रयमयासने ॥
शिवप्रियः शिवासक्तः शिवपादार्चने रतः ।
शिवस्याज्ञां पुरस्कृत्य स मे दिशतु मङ्गलम् ॥

वासुदेवोऽनिरुद्धश्च प्रद्युम्नश्च ततः परः ।
सङ्कर्षणः समाख्याताश्चतस्रो मूर्तयः हरेः ॥
मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ।

रामत्रयं तथा कृष्णो विष्णुस्तुरगवक्त्रकः ॥
चक्रं नारायणास्त्रं पाञ्चजन्यं च शार्ङ्कम् ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥

प्रभा सरस्वती गौरी लक्ष्मीश्च शिवभाविता ।
शिवयोः शासनादेता मङ्गलं प्रदिशन्तु मे ॥

इन्द्रोग्निश्च यमश्चैव निर्ऋतिर्वरुणस्तथा ।
वायुः सोमः कुबेरश्च तथेशानस्त्रिशूलधृक् ॥
सर्वे शिवार्चनरताः शिवसद्भावभाविताः ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥

त्रिशूलमथ वज्रं च तथा परशुसायकौ ।
खड्गपाशाङ्कुशाश्चैव पिनाकश्चायुधोत्तमः ॥
सव्यायुधानि देवस्य देव्याश्चैतानि नित्यशः ।
सत्कृत्य शिवयोराज्ञां रक्षां कुर्वन्तु मे सदा ॥

वृषरूपधरो देवः सौरभेयो महाबलः ।
वडवाख्यानलस्पर्धी पञ्चगोमातृभिर्वृतः ॥
वाहनत्वमनुप्राप्तस्तपसा परमेशयोः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥

नन्दा सुनन्दा सुरभिः सुशीला सुमनास्तथा ।
पञ्चगोमातरस्त्वेताः शिवलोके व्यवस्थिताः ॥
शिवभक्तिपरा नित्यं शिवार्चनपरायणाः ।
शिवयोः शासनादेव दिशन्तु मम वाञ्छितम् ॥

क्षेत्रपालो महातेजा नीलजीमूतसन्निभः ।
दंष्ट्राकरालवदनः स्फुरद्रक्ताधरोज्ज्वलः ॥
रक्तोर्ध्वमूर्धजः श्रीमान् भ्रुकुटीकुटिलेक्षणः ।
रक्तवृत्तत्रिनयनः शशिपन्नगभूषणः ॥
नग्नस्त्रिशूलपाशासिकपालोद्यतपाणिकः ।
भैरवो भैरवैः सिद्धैर्योगिनीभिश्च संवृतः ॥
क्षेत्रे क्षेत्रे समासीनः स्थितो यो रक्षकः सताम् ।
शिवप्रणामपरमः शिवसद्भावभावितः ॥
शिवाश्रितान् विशेषेण रक्षन् पुत्रानिवौरसान् ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥

तालजङ्घादयस्तस्य प्रथमावरणेऽर्चिताः ।
सत्कृत्य शिवयोराज्ञां चत्वारः समवन्तु माम् ॥

भैरवाद्याश्च ये चान्ये समन्तात् तस्य वेष्टिताः ।
तेऽपि मामनुगृह्णन्ति शिवशासनगौरवात् ॥

नारदाद्याश्च मुनयो दिव्या देवैश्च पूजिताः।
साध्या नागाश्च ये देवा जनलोकनिवासिनः॥
विनिवृत्ताधिकाराश्च महर्लोकनिवासिनः।
सप्तर्षयस्तथाऽन्ये वै वैमानिकगणैः सह॥
सर्वे शिवार्चनरताः शिवाज्ञावशवर्तिनः।
शिवयोराज्ञया मह्यं दिशन्तु मम काङ्क्षितम्॥

गन्धर्वाद्याः पिशाचान्ताश्चतस्रो देवयोनयः।
सिद्धा विद्याधराद्याश्च येऽपि चान्ये नभश्चराः॥
असुरा राक्षसाश्चैव पातालतलवासिनः।
अनन्ताद्याश्च नागेन्द्रा वैनतेयादयो द्विजाः॥
कूष्माण्डः प्रेतवेताला ग्रहा भूतगणाः परे।
डाकिन्यश्चापि योगिन्यः शाकिन्यश्चापि तादृशः॥
क्षेत्रारामगृहादीनि दीर्घान्यायतनानि च।
द्वीपाः समुद्रा नद्यश्च नदाश्चान्ये सरांसि च॥
गिरयश्च सुमेर्वाद्याः काननानि समन्ततः।
पशवः पक्षिणो वृक्षाः कृमिकीटादयो मृगाः॥
भुवनान्यपि सर्वाणि भुवनानामधीश्वराः।
अण्डान्यावरणैस्साार्धमाशाश्च दशदिग्गजाः॥
वर्णाः पदानि मन्त्राश्च तत्त्वान्यपि सहाधिपैः।
ब्रह्माण्डधारका रुद्रा रुद्राश्चान्ये सशक्तिकाः॥

यच्च किञ्चिज्जगत्यस्मिन् दृष्टं चानुमितं श्रुतम्।
सर्वे कामं प्रयच्छन्तु शिवयोरेव शासनात्॥

अथ विद्या परा शैवी पशुपाशविमोचिनी।
पञ्चार्थसंज्ञिता दिव्या पशुविद्याबहिष्कृता॥
शास्त्रं च शिवधर्माख्यं धर्माख्यं च तदुत्तरम्।
शैवाख्यं शिवधर्माख्यं पुराणं श्रुतिसम्मितम्॥
शिवागमाश्च ये चान्ये कामिकाद्याश्चतुर्विधाः।
शिवाभ्यामविशेषेण सत्कृत्येह समर्चिताः॥
ताभ्यामेव समाज्ञाता ममाभीष्टार्थसिद्धये।
कर्मेदमनुमन्यन्तां सफलं साध्वनिष्ठितम्॥

श्वेताद्या नकुलीशान्ताः सशिष्याश्चापि देशिकाः।
तत्सन्ततीया गुरवो विशेषाद्गुरवो मम॥
शैवा माहेश्वराश्चैव ज्ञानकर्मपरायणाः।
कर्मेदमनुमन्यन्तां सफलं साध्वनिष्ठितम्॥

लौकिका ब्राह्मणाः सर्वे क्षत्रियाश्च विशः क्रमात्।
वेदवेदान्ततत्त्वज्ञाः सर्वशास्त्रविशारदाः॥
सांख्या वैशेषिकाश्चैव यौगा नैय्यायिका नराः।
सौरा ब्रह्मास्तथा रौद्रा वैष्णवाश्चापरे नराः॥

शिष्टाः सर्वे विशिष्टाश्च शिवशासनयन्त्रिताः ।
कर्मेदमनुमन्यन्तां सफलं साध्वनुष्ठितम् ॥

शैवाः सिद्धान्तमार्गस्थाः शैवाः पाशुपतास्तथा ।
शैवा महाव्रतधराः शैवाः कापालिकाः परे ॥
शिवाज्ञापालकाः पूज्या ममापि शिवशासनात् ।
सर्वे मामनुगृह्णन्तु शंसन्तु सफलक्रियाम् ॥

दक्षिणज्ञाननिष्ठाश्च दक्षिणोत्तरमार्गगाः ।
अविरोधेन वर्तन्तां मन्त्रश्रेयोऽर्थिनो मम ॥

नास्तिकाश्च शठाश्चैव कृतघ्नाश्चैव तामसाः ।
पाषण्डाश्चातिपापाश्च वर्तन्तां दूरतो मम ॥

बहुभिः किं स्तुतैरत्र येऽपि केऽपि चिदास्तिकाः ।
सर्वे मामनुगृह्णन्तु सन्तः शंसन्तु मङ्गलम् ॥

नमश्शिवाय साम्बाय ससुतायादिहेतवे ।
पञ्चावरणरूपेण प्रपञ्चेनावृताय ते ॥

इत्युक्त्वा दण्डवद्भूमौ प्रणिपत्य शिवं शिवाम् ।
जपेत् पञ्चाक्षरीं विद्यामष्टोत्तरशतावराम् ॥

तथैव शक्तिविद्यां च जपित्वा तत्समर्पणम् ।
कृत्वा तं क्षमयित्वेशं पूजाशेषं समापयेत् ॥
एतत् पुण्यमयं स्तोत्रं शिवयोर्हृदयङ्गमम् ।
सर्वाभीष्टप्रदं साक्षाद्भुक्तिमुक्त्यैकसाधनम् ॥
य इदं कीर्तयेन्नित्यं शृणुयाद्वा समाहितः ।
स विधूयाशु पापनि शिवसायुज्यमाप्नुयात् ॥
गोघ्नश्चैव कृतघ्नश्च वीरहा भ्रूणहापि वा ।
शरणागतघाती च मित्रविश्रम्भघातकः ॥
दुष्टपापसमाचारो मातृहा पितृहाऽपि वा ।
स्तवेनानेन जप्तेन तत्तत्पापात् प्रमुच्यते ॥
दुःस्वप्नादि महानर्थसूचिकेषु भयेषु च ।
यदि सङ्कीर्तयेदेतन्नततोऽनर्थभाग्भवेत् ॥
आयुरारोग्यमैश्वर्यं यच्चान्यदपि वाञ्छितम् ।
स्तोत्रस्यास्य जपे तिष्ठंस्तत्सर्वं लभते नरः ॥
असंपूज्य शिवं स्तोत्रजपात् फलमुदाहृतम् ।
संपूज्य च जपे तस्य फलं वक्तुं न शक्यते ॥
तस्मान्नभसि संपूज्य देवदेवं सहोमया ।
कृताञ्जलिपुटस्तिष्ठन् स्तोत्रमेतदुदीरयेत् ॥

॥ इति शैवे महापुराणे सप्तम्यां वायवीयसंहितायामुत्तरभागे
शिवमहास्तोत्रम् ॥

upamanyuruvāca

stotraṃ vakṣyāmi te kṛṣṇa pañcāvaraṇamārgataḥ |
yogeśvaramidaṃ puṇyaṃ karma yena samāpyate ||

jaya jaya jagadekanātha śambho
prakṛtimanohara nityacitsvabhāva |
atigatakaluṣaprapañcavācā-
mapi manasāṃ padavīmatītatattvam ||
svabhāvanirmalābhoga jaya sundaraceṣṭita |
svātmatulyamahāśakte jaya śuddhaguṇārṇava ||
anantakāntisampanna jayāsadṛśavigraha |
atarkyamahimādhāra jayānākulamaṅgala ||
nirañjana nirādhāra jaya niṣkāraṇodaya |
nirantaraparānanda jaya nirvṛtikāraṇa ||
jayātiparamaiśvarya jayātikaruṇāspada |
jaya svatantrasarvasva jayāsadṛśavaibhava ||
jayāvṛtamahāviśva jayānāvṛtakenacit |
jayottara samastasya jayātyantaniruttara ||
jayādbhuta jayākṣudra jayākṣata jayāvyaya |
jayāmeya jayāmāya jayābhāva jayāmala ||
mahābhuja mahāsāra mahāguṇa mahākatha |
mahābala mahāmāya mahārasa mahāratha ||
namaḥ paramadevāya namaḥ paramahetave |
namaḥ śivāya śāntāya namaḥ śivatarāya te ||
tvadadhīnamidaṃ kṛtsnaṃ jagaddhi sasurāsuram |
atastvadvihitāmājñāṃ kṣamate ko.ativartitum ||

ayaṃ punarjano nityaṃ bhavadekasamāśrayaḥ |
bhavānato.anugṛhyāsmai prārthitaṃ saṃprayacchatu ||

jayāmbike jaganmātarjaya sarvajaganmayi |
jayānavadhikaiśvarye jayānupamavigrahe ||
jaya vāṅmanasātīte jayāciddhvāntabhañjike |
jaya janmajarāhīne jaya kālottarottare ||
jayānekavidhānasthe jaya viśveśvarapriye |
jaya viśvasurārādhye jaya viśvavijṛṃbhiṇi ||
jaya maṅgaladivyāṅgi jaya maṅgaladīpike |
jaya maṅgalacāritre jaya maṅgaladāyini ||
namaḥ paramakalyāṇaguṇasañcayamūrtaye |
tvattaḥ khalu samutpannaṃ jagatvayyeva līyate ||
tvadvinātaḥ phalaṃ dātumīśvaro.api na śaknuyāt |
janmaprabhṛti deveśi janoyaṃ tvadupāśritaḥ |
ato.asya tava bhaktasya nirvartaya manoratham ||

pañcavaktro daśabhujaḥ śuddhasphaṭikasannibhaḥ |
varṇabrahmakalādeho devaḥ sakalaniṣkalaḥ ||
śivabhaktisamārūḍhaḥ śāntyatītaḥ sadāśivaḥ |
bhaktyā mayārcito mahyaṃ prārthitaṃ śaṃ prayacchatu ||

sadāśivāṅkamārūḍhā śaktiricchā śivāhvayā |
jananī sarvalokānāṃ prayacchatu manoratham ||

śivayordayitau putrau devau herambaṣaṇmukhau |
śivānubhāvau sarvajñau śivajñānāmṛtāśinau ||
tṛptau parasparaṃ snigdhau śivābhyāṃ nityasatkṛtau |

satkṛtau ca sadā devau brahmādyaistridaśairapi ||
sarvalokaparitrāṇaṃ kartumabhyuditau sadā |
svecchāvatāraṃ kurvantau svāṃśabhedairanekaśaḥ ||
tāvimau śivayoḥ pārśve nityamitthaṃ mayārcitau |
tayorājñāṃ puraskṛtya prārthitaṃ me prayacchatām ||

śuddhasphaṭikasaṅkāśamīśānākhyaṃ sadāśivam |
mūrdhābhimāninī mūrtiḥ śivasya paramātmanaḥ ||
śivārcanaratam̐ śāntaṃ śāntyatītaṃ khamāsthitam |
pañcākṣarāntimaṃ bījaṃ kalābhiḥ pañcabhiryutam ||
prathamāvaraṇe pūrvaṃ śaktyā saha samarcitam |
pavitraṃ paramaṃ brahma prārthitaṃ me prayaccatu ||

bālasūryapratīkāśaṃ puruṣākhyaṃ purātanam |
pūrvavaktrābhimānaṃ ca śivasya parameṣṭhinaḥ ||
śāntyātmakaṃ marutsaṃsthaṃ śambhoḥ pādārcane ratam |
prathamaṃ śivabījeṣu kalāsu ca catuṣkalam ||
pūrvabhāge mayā bhaktyā śaktyā saha samarcitam |
pavitraṃ paramaṃ brahma prārthitaṃ me prayacchatu ||

añjanādripratīkāśamaghoraṃ ghoravigraham |
devasya dakṣiṇaṃ vaktraṃ devadevapadārcakam ||
vidyāpādaṃ samārūḍhaṃ vahnimaṇḍalamadhyagam |
dvitīyaṃ śivabījeṣu kalāsvaṣṭakalānvitam ||
śambhordakṣiṇadigbhāge śaktyā saha samarcitam |
pavitraṃ madhyamaṃ brahma prārthitaṃ me prayacchatu ||

kuṅkumakṣodasaṅkāśaṃ vāmākhyaṃ varaveṣadhṛk |

vaktramuttaramīśasya pratiṣṭhāyāṃ pratiṣṭhitam ||
vārimaṇḍalamadhyasthaṃ mahādevārcane ratam |
turīyaṃ śivabījeṣu trayodaśakalānvitam ||
devasyottaradigbhāge śaktyā saha samarcitam |
pavitraṃ paramaṃ brahma prārthitaṃ me prayacchatu ||

śaṅkhakundendudhavalaṃ sadyākhyaṃ saumyalakṣaṇam |
śivasya paścimaṃ vaktraṃ śivapādārcane ratam ||
nivṛttipadaniṣṭhaṃ ca pṛthivyāṃ samavasthitam |
tṛtīyaṃ śivabījeṣu kalābhiścāṣṭabhiryutam ||
devasya paścime bhāge śaktyā saha samarcitam |
pavitraṃ paramaṃ brahma prārthitaṃ me prayacchatu ||

śivasya tu śivāyāśca hṛnmūrtī śivabhāvite |
tayorājñāṃ puraskṛtya te me kāmaṃ prayacchatām ||
śivasya tu śivāyāśca śikhāmūrtī śivāśrite |
satkṛtya śivayorājñāṃ te me kāmaṃ prayacchatām ||
śivasya tu śivāyāśca varmaṇā śivabhāvite |
satkṛtya śivayorājñāṃ te me kāmaṃ prayacchatām ||
śivasya tu śivāyāśca netramūrtī śivāśrite |
satkṛtya śivayorājñāṃ te me kāmaṃ prayacchatām ||
astramūrtī ca śivayornityamarcanatatpare |
satkṛtya śivayorājñāṃ te me kāmaṃ prayacchatām ||

vāmo jyeṣṭhastathā rudraḥ kālo vikaraṇastathā |
balo vikaraṇaścaiva balapramathanaḥ paraḥ ||
sarvabhūtasya damanastādṛśāścāṣṭa śaktayaḥ |
prārthitaṃ me prayacchantu śivayoreva śāsanāt ||

athānantaśca sūkṣmaśca śivaścāpyekanetrakaḥ |
ekarudrākhyamūrtiśca śrīkaṇṭhaśca śikhaṇḍakaḥ ||
tathāṣṭau śaktayasteṣāṃ dvitīyāvaraṇe.arcitāḥ |
te me kāmaṃ prayacchantu śivayoreva śāsanāt ||

bhavādyā mūrtayaścāṣṭau tāsāmapi ca śaktayaḥ |
mahādevādayaścānye tathaikādaśamūrtayaḥ ||
śaktibhissahitāssarve tṛtīyāvaraṇe sthitāḥ |
satkṛtya śivayorājñāṃ diśeta phalamīpsitam ||

vṛṣarājo mahātejā mahāmeghasamanvanaḥ |
merumandārakailāsahimādriśikharopamaḥ ||
sitābhraśikharākāraḥ kakudā pariśobhitaḥ |
mahābhogīndrakalpena vālena ca virājitaḥ ||
raktāsyaśṛṅgacaraṇo raktaprāyavilocanaḥ |
pīvaronnatasarvāṅgaḥ sucārugamanojjvalaḥ ||
praśastalakṣaṇaḥ śrīmān prajvalanmaṇibhūṣaṇaḥ |
śivapriyaḥ śivāsaktaḥ śivayordhvajavāhanaḥ ||
tathā taccaraṇanyāsapāvitāparavigrahaḥ |
gorājapuruṣaḥ śrīmān śrīmacchūlavarāyudhaḥ |
tayorājñāṃ puraskṛtya sa me kāmaṃ prayacchatu ||

nandīśvaro mahātejā nagendratanayātmajaḥ |
sanārāyaṇakairdevairnityamabhyarcya vanditaḥ ||
śarvasyāntaḥpuradvāri sārdhaṃ parijanaiḥ sthitaḥ |
sarveśvarasamaprakhyaḥ sarvāsuravimardanaḥ ||
sarveṣāṃ śivadharmāṇāmadhyakṣatve.abhiṣecitaḥ |

śivapriyaḥ śivāsaktaḥ śrīmacchūlavarāyudhaḥ ||
śivāśriteṣu saṃsaktastvanuraktaśca tairapi |
satkṛtya śivayorājñāṃ sa me kāmaṃ prayacchatu ||

mahākālo mahābāhurmahādeva ivāparaḥ |
mahādevāśritānāṃ tu nityamevābhirakṣatu ||
śivapriyaḥ śivāsaktaḥ śivayorarcakaḥ sadā |
satkṛtya śivayorājñāṃ sa me diśatu kāṅkṣitam ||

sarvaśāstrārthatattvajñaḥ śāstā viṣṇoḥ parā tanuḥ |
mahāmohātmatanayo madhumāṃsāsavapriyaḥ |
tayorājñāṃ puraskṛtya sa me kāmaṃ prayacchatu ||

brahmāṇī caiva māheśī kaumārī vaiṣṇavī tathā |
vārāhī caiva māhendrī cāmuṇḍā caṇḍavikramā ||
etā vai mātarassapta sarvalokasya mātaraḥ |
prārthitaṃ me prayacchantu parameśvaraśāsanāt ||

mattamātaṅgavadano gaṅgomāśaṅkarātmajaḥ |
ākāśadeho digbāhuḥ somasūryāgnilocanaḥ ||
airāvatādibhirdivyaiḥ diggajairnityamarcitaḥ |
śivajñānamadodbhinnastridaśānāmavighnakṛt ||
vighnakṛccāsurādīnāṃ vighneśaḥ śivabhāvitaḥ |
satkṛtya śivayorājñāṃ sa me diśatu kāṅkṣitam ||

ṣaṇmukhaḥ śivasambhūtaḥ śaktivajradharaḥ prabhuḥ |
agneśca tanayo devo hyaparṇātanayaḥ punaḥ ||
gaṅgāyāśca gaṇāmbāyāḥ kṛttikānāṃ tathaiva ca |

viśākhena ca śākhena naigameyena cāvṛtaḥ ||
indrajiccandrasenānīstārakāsurajit tathā |
śailānāṃ merumukhyānāṃ vedhakaśca svatejasā ||
taptacāmīkaraprakhyaḥ śatapatradalekṣaṇaḥ |
kumārastu kumārāṇāṃ rūpodāharaṇaṃ mahat ||
śivapriyaḥ śivāsaktaḥ śivapādārcakaḥ sadā |
satkṛtya śivayorājñāṃ sa me diśatu kāṅkṣitam ||

jyeṣṭhā variṣṭhā varadā śivayoryajane ratā |
tayorājñāṃ puraskṛtya sā me diśatu kāṅkṣitam ||

trailokyavanditā sākṣādulkākārā gaṇāmbikā |
jagatsṛṣṭivivṛddhyarthaṃ brahmaṇābhyarthitā śivāt ||
śivāyāḥ pravibhaktāyā bhruvorantaranissṛtāḥ |
dākṣāyaṇī satī menā tathā haimavatī hyumā ||
kauśikyāścaiva jananī bhadrakālyāstathaiva ca |
aparṇāyāśca jananī pāṭalāyāstathaiva ca ||
śivārcanaratā nityaṃ rudrāṇī rudravallabhā |
satkṛtya śivayorājñāṃ sā me diśatu kāṅkṣitam ||

caṇḍaḥ sarvagaṇeśānaḥ śambhorvadanasambhavaḥ |
satkṛtya śivayorājñāṃ sa me diśatu kāṅkṣitam ||

piṅgalo gaṇapaḥ śrīmān śivāsaktaḥ śivapriyaḥ |
ājñayā śivayoreva sa me kāmaṃ prayacchatu ||

bhṛṅgīśo nāma gaṇapaḥ śivārādhanatatparaḥ |
prayacchatu sa me kāmaṃ patyurājñāpurassaram ||

vīrabhadro mahātejā himakundendusannibhaḥ |
bhadrakālīpriyo nityaṃ mātṝṇāṃ cā.abhirakṣitaḥ ||
yajñasya ca śirohartā dakṣasya ca durātmanaḥ |
upendrendrayamādīnāṃ devānāmaṅgatakṣakaḥ ||
śivasyānucaraḥ śrīmān śivaśāsanapālakaḥ |
śivayoḥ śāsanādeva sa me diśatu kāṅkṣitam ||

sarasvatī maheśasya vāksarojasamudbhavā |
śivayoḥ pūjane saktā sā me diśatu kāṅkṣitam ||

viṣṇorvakṣasthitā lakṣmīḥ śivayoḥ pūjane ratā |
śivayoḥ śāsanādeva sā me diśatu kāṅkṣitam ||

mahāmoṭī mahādevyāḥ pādapūjāparāyaṇā |
tasyā eva niyogena sā me diśatu kāṅkṣitam ||

kauśikī siṃhamārūḍhā pārvatyāḥ paramā sutā |
viṣṇornidrā mahāmāyā mahāmahiṣamardinī ||
niśumbhaśumbhasaṃhartrī madhumāṃsāsavapriyā |
satkṛtya śāsanaṃ mātuḥ sā me diśatu kāṅkṣitam ||

rudrā rudrasamaprakhyāḥ pramathāḥ prathitaujasaḥ |
bhūtākhyāśca mahāvīryā mahādevasamaprabhāḥ ||
nityamuktā nirupamā nirdvandvā nirupaplavāḥ |
saśaktayaḥ sānucarāḥ sarvalokanamaskṛtāḥ ||
sarveṣāmeva lokānāṃ sṛṣṭisaṃharaṇakṣamāḥ |
parasparānuraktāśca parasparamanuvratāḥ ||

parasparamatisnigdhāḥ parasparanamaskṛtāḥ |
śivapriyatamā nityaṃ śivalakṣaṇalakṣitāḥ ||
saumyādhārāstathā miśrāścāntarāladvayātmikāḥ |
virūpāśca surūpāśca nānārūpadharāstathā |
satkṛtya śivayorājñāṃ te me kāmaṃ diśantu vai ||

devyāḥ priyasakhīvargo devīlakṣaṇalakṣitaḥ |
sahito rudrakanyābhiḥ śaktibhiścāpyanekaśaḥ ||
tṛtīyāvaraṇe śambhorbhaktyā nityaṃ samarcitaḥ |
satkṛtya śivayorājñāṃ sa me diśatu maṅgalam ||

divākaro maheśasya mūrtirdīptasumaṇḍalaḥ |
nirguṇo guṇasaṅkīrṇastathaiva guṇakevalaḥ ||
avikārātmakaścādya ekassāmānyavikriyaḥ |
asādhāraṇakarmā ca sṛṣṭisthitilayakramāt ||
evaṃ tridhā caturdhā ca vibhaktaḥ pañcadhā punaḥ |
caturthāvaraṇe śambhoḥ pūjitaścānugaiḥ saha ||
śivapriyaḥ śivāsaktaḥ śivapādārcane rataḥ |
satkṛtya śivayorājñāṃ sa me diśatu maṅgalam ||

divākaraṣaḍaṅgāni dīptādyāścāṣṭaśaktayaḥ |
ādityo bhāskaro bhānū raviścetyanupūrvaśaḥ ||
arko brahmā tathā rudro viṣṇuścādityamūrtayaḥ |
vistarā sutarā bodhinyāpyāyinyaparā punaḥ ||
uṣā prabhā tathā prājñā sandhyā cetyapi śaktayaḥ |
somādiketuparyantā grahāśca śivabhāvitāḥ |
satkṛtya śivayorājñāṃ maṅgalaṃ pradiśantu me ||

athavā dvādaśādityāstathā dvādaśa śaktayaḥ |
ṛṣayo devagandharvāḥ pannagāpsarasāṃ gaṇāḥ ||
grāmaṇyaśca tathā yakṣā rakṣasāścāsurāstathā |
saptasaptagaṇāścaite saptacchandomayā hayāḥ ||
vālikhilyādayaścaiva sarve śivapadārcakāḥ |
satkṛtya śivayorājñāṃ maṅgalaṃ pradiśantu me ||

brahmā.atha devadevasya mūrtirbhūmaṇḍalādhipaḥ |
catuḥṣaṣṭiguṇaiśvaryo buddhitattve pratiṣṭhitaḥ ||
nirguṇo guṇasaṅkīrṇastathaiva guṇakevalaḥ |
avikārātmako devastatassādhāraṇaḥ puraḥ ||
asādhāraṇakarmā ca sṛṣṭisthitilayakramāt |
evaṃ tridhā caturdhā ca vibhaktaḥ pañcadhā punaḥ ||
caturthāvaraṇe śambhoḥ pūjitaśca sahānugaḥ |
śivapriyaḥ śivāsaktaḥ śivapādārcane rataḥ |
satkṛtya śivayorājñāṃ sa me diśatu maṅgalam ||

hiraṇyagarbho lokeśo virāṭ kālaśca pūruṣaḥ |
sanatkumāraḥ sanakaḥ sanandaśca sanātanaḥ ||
prajānāṃ patayaścaiva dakṣādyā brahmasūnavaḥ |
ekādaśasapatnīkā dharmasaṅkalpa eva ca ||
śivārcanaratāścaite śivabhaktiparāyaṇāḥ |
śivājñāvaśagāḥ sarve diśantu mama maṅgalam ||

catvāraśca tathā vedāḥ setihāsapurāṇakāḥ |
dharmaśāstrāṇi vidyābhirvaidikībhiḥ samanvitāḥ ||
parasparaviruddhārthāḥ śivaprakṛtipādakāḥ |
satkṛtya śivayorājñāṃ maṅgalaṃ pradiśantu me ||

atha rudro mahādevaḥ śambhormūrtirgarīyasī |
vāhneyamaṇḍalādhīśaḥ pauruṣaiśvaryavān prabhuḥ ||
śivābhimānasampanno nirguṇastriguṇātmakaḥ |
kevalaṃ sāttvikaścāpi rājasaścaiva tāmasaḥ ||
avikāraratạḥ pūrvaṃ tatastu samavikriyaḥ |
asādhāraṇakarmā ca sṛṣṭyādikaraṇāt pṛthak ||
brahmaṇo.api śiracchettā janakastasya tatsutaḥ |
janakastanayaścāpi viṣṇorapi niyāmakaḥ ||
bodhakaśca tayornityamanugrahakaraḥ prabhuḥ |
aṇḍasyāntarbahirvartī rudro lokadvayādhipaḥ ||
śivapriyaḥ śivāsaktaḥ śivapādārcane rataḥ |
śivasyājñāṃ puraskṛtya sa me diśatu maṅgalam ||

tasya brahma ṣaḍaṅgāni vidyeśāntaṃ tathāṣṭakam |
catvāro mūrtibhedāśca śivapūrvāḥ śivārcakāḥ ||
śivo bhavo haraścaiva mṛḍaścaiva tathā.aparaḥ |
śivasyājñāṃ puraskṛtya maṅgalaṃ pradiśantu me ||

atha viṣṇurmaheśasya śivasyaiva parā tanuḥ |
vāritattvādhipaḥ sākṣādavyaktapadasaṃsthitaḥ ||
nirguṇaḥ tattvabahulastathaiva guṇakevalaḥ |
avikārābhimānī ca trisādhāraṇavikriyaḥ ||
asādhāraṇakarmā ca sṛṣṭyādikārāṇāt pṛthak |
dakṣiṇāṅgabhavenāpi spardhamānaḥ svayambhuvā ||
ādyena brahmaṇā sākṣāt sṛṣṭaḥ sraṣṭā ca tasya tu |
aṇḍasyāntarbahirvartī viṣṇurlokadvayādhipaḥ ||
asurāntakaraścakrī śakrasyāpi tathā.anujaḥ |

prādurbhūtaśca daśadhā bhṛguśāpācchalādiha ||
bhūbhāranigrahārthāya svecchayā.avātarat kṣitau |
aprameyabalo māyī māyayā mohayajjagat ||
mūrtiṃ kṛtvā mahāviṣṇuṃ sadāviṣṇumathāpi vā |
vaiṣṇavaiḥ pūjito nityaṃ mūrtitrayamayāsane ||
śivapriyaḥ śivāsaktaḥ śivapādārcane rataḥ |
śivasyājñāṃ puraskṛtya sa me diśatu maṅgalam ||

vāsudevo.aniruddhaśca pradyumnaśca tataḥ paraḥ |
saṅkarṣaṇaḥ samākhyātāścatasro mūrtayaḥ hareḥ ||
matsyaḥ kūrmo varāhaśca nārasiṃho.atha vāmanaḥ |
rāmatrayaṃ tathā kṛṣṇo viṣṇusturagavaktrakaḥ ||
cakraṃ nārāyaṇāstraṃ pāñcajanyaṃ ca śārṅakam |
satkṛtya śivayorājñāṃ maṅgalaṃ pradiśantu me ||

prabhā sarasvatī gaurī lakṣmīśca śivabhāvitā |
śivayoḥ śāsanādetā maṅgalaṃ pradiśantu me ||

indrogniśca yamaścaiva nirṛtirvaruṇastathā |
vāyuḥ somaḥ kuberaśca tatheśānastriśūladhṛk ||
sarve śivārcanaratāḥ śivasadbhāvabhāvitāḥ |
satkṛtya śivayorājñāṃ maṅgalaṃ pradiśantu me ||

triśūlamatha vajraṃ ca tathā paraśusāyakau |
khaḍgapāśāṅkuśāścaiva pinākaścāyudhottamaḥ ||
savyāyudhāni devasya devyāścaitāni nityaśaḥ |
satkṛtya śivayorājñāṃ rakṣāṃ kurvantu me sadā ||

vṛṣarūpadharo devaḥ saurabheyo mahābalaḥ |
vaḍavākhyānalaspardhāṃ pañcagomātṛbhirvṛtaḥ ||
vāhanatvamanuprāptastapasā parameśayoḥ |
tayorājñāṃ puraskṛtya sa me kāmaṃ prayacchatu ||

nandā sunandā surabhiḥ suśīlā sumanāstathā |
pañcagomātarastvetāḥ śivaloke vyavasthitāḥ ||
śivabhaktiparā nityaṃ śivārcanaparāyaṇāḥ |
śivayoḥ śāsanādeva diśantu mama vāñchitam ||

kṣetrapālo mahātejā nīlajīmūtasannibhaḥ |
daṃṣṭrākarālavadanaḥ sphuradraktādharojjvalaḥ ||
raktordhvamūrdhajaḥ śrīmān bhrukuṭīkuṭilekṣaṇaḥ |
raktavṛttatrinayanaḥ śaśipannagabhūṣaṇaḥ ||
nagnastriśūlapāśāsikapālodyatapāṇikaḥ |
bhairavo bhairavaiḥ siddhairyoginībhiśca saṃvṛtaḥ ||
kṣetre kṣetre samāsīnaḥ sthito yo rakṣakaḥ satām |
śivapraṇāmaparamaḥ śivasadbhāvabhāvitaḥ ||
śivāśritān viśeṣeṇa rakṣan putrānivaurasān |
satkṛtya śivayorājñāṃ sa me diśatu maṅgalam ||

tālajaṅghādayastasya prathamāvaraṇe.arcitāḥ |
satkṛtya śivayorājñāṃ catvāraḥ samavantu mām ||

bhairavādyāśca ye cānye samantāt tasya veṣṭitāḥ |
te.api māmanugṛhṇanti śivaśāsanagauravāt ||

nāradādyāśca munayo divyā devaiśca pūjitāḥ |

sādhyā nāgāśca ye devā janalokanivāsinaḥ ||
vinivṛttādhikārāśca maharlokanivāsinaḥ |
saptarṣayastathā.anye vai vaimānikagaṇaiḥ saha ||
sarve śivārcanaratāḥ śivājñāvaśavartinaḥ |
śivayorājñayā mahyaṃ diśantu mama kāṅkṣitam ||

gandharvādyāḥ piśācāntāścatasro devayonayaḥ |
siddhā vidyādharādyāśca ye.api cānye nabhaścarāḥ ||
asurā rākṣasāścaiva pātālatalavāsinaḥ |
anantādyāśca nāgendrā vainateyādayo dvijāḥ ||
kūṣmāṇḍaḥ pretavetālā grahā bhūtagaṇāḥ pare |
ḍākinyaścāpi yoginyaḥ śākinyaścāpi tādṛśaḥ ||
kṣetrārāmagṛhādīni dīrghānyāyatanāni ca |
dvīpāḥ samudrā nadyaśca nadāścānye sarāṃsi ca ||
girayaśca sumervādyāḥ kānanāni samantataḥ |
paśavaḥ pakṣiṇo vṛkṣāḥ kṛmikīṭādayo mṛgāḥ ||
bhuvanānyapi sarvāṇi bhuvanānāmadhīśvarāḥ |
aṇḍānyāvaraṇaissārdhamāśāśca daśadiggajāḥ ||
varṇāḥ padāni mantrāśca tattvānyapi sahādhipaiḥ |
brahmāṇḍadhārakā rudrā rudrāścānye saśaktikāḥ ||
yacca kiñcijjagatyasmin dṛṣṭaṃ cānumitaṃ śrutam |
sarve kāmaṃ prayacchantu śivayoreva śāsanāt ||

atha vidyā parā śaivī paśupāśavimocinī |
pañcārthasaṃjñitā divyā paśuvidyābahiṣkṛtā ||
śāstraṃ ca śivadharmākhyaṃ dharmākhyaṃ ca taduttaram |
śaivākhyaṃ śivadharmākhyaṃ purāṇaṃ śrutisammitam ||
śivāgamāśca ye cānye kāmikādyāścaturvidhāḥ |

śivābhyāmaviśeṣeṇa satkṛtyeha samarcitāḥ ||
tābhyāmeva samājñātā mamābhīṣṭārthasiddhaye |
karmedamanumanyantāṃ saphalaṃ sādhvaniṣṭhitam ||

śvetādyā nakulīśāntāḥ saśiṣyāścāpi deśikāḥ |
tatsantatīyā guravo viśeṣādguravo mama ||
śaivā māheśvarāścaiva jñānakarmaparāyaṇāḥ |
karmedamanumanyantāṃ saphalaṃ sādhvaniṣṭhitam ||

laukikā brāhmaṇāḥ sarve kṣatriyāśca viśaḥ kramāt |
vedavedāntatattvajñāḥ sarvaśāstraviśāradāḥ ||
sāṃkhyā vaiśeṣikāścaiva yaugā naiyyāyikā narāḥ |
saurā brahmāstathā raudrā vaiṣṇavāścāpare narāḥ ||
śiṣṭāḥ sarve viśiṣṭāśca śivaśāsanayantritāḥ |
karmedamanumanyantāṃ saphalaṃ sādhvanuṣṭhitam ||

śaivāḥ siddhāntamārgasthāḥ śaivāḥ pāśupatāstathā |
śaivā mahāvratadharāḥ śaivāḥ kāpālikāḥ pare ||
śivājñāpālakāḥ pūjyā mamāpi śivaśāsanāt |
sarve māmanugṛhṇantu śaṃsantu saphalakriyām ||

dakṣiṇajñānaniṣṭhāśca dakṣiṇottaramārgagāḥ |
avirodhena vartantāṃ mantraśreyo.arthino mama ||

nāstikāśca śaṭhāścaiva kṛtaghnāścaiva tāmasāḥ |
pāṣaṇḍāścātipāpāśca vartantāṃ dūrato mama ||

bahubhiḥ kiṃ stutairatra ye.api ke.api cidāstikāḥ |

sarve māmanugṛhṇantu santaḥ śaṃsantu maṅgalam ||

namaśśivāya sāmbāya sasutāyādihetave |
pañcāvaraṇarūpeṇa prapañcenāvṛtāya te ||

ityuktvā daṇḍavadbhūmau praṇipatya śivaṃ śivām |
japet pañcākṣarīṃ vidyāmaṣṭottaraśatāvarām ||
tathaiva śaktividyāṃ ca japitvā tatsamarpaṇam |
kṛtvā taṃ kṣamayitveśaṃ pūjāśeṣaṃ samāpayet ||
etat puṇyamayaṃ stotraṃ śivayorhṛdayaṅgamam |
sarvābhīṣṭapradaṃ sākṣādbhuktimuktyaikasādhanam ||
ya idaṃ kīrtayennityaṃ śṛṇuyādvā samāhitaḥ |
sa vidhūyāśu pāpani śivasāyujyamāpnuyāt ||
goghnaścaiva kṛtaghnaśca vīrahā bhrūṇahāpi vā |
śaraṇāgataghātī ca mitraviśrambhaghātakaḥ ||
duṣṭapāpasamācāro mātṛhā pitṛhā.api vā |
stavenānena japtena tattatpāpāt pramucyate ||
duḥsvapnādi mahānarthasūcikeṣu bhayeṣu ca |
yadi saṅkīrtayedetannatato.anarthabhāgbhavet ||
āyurārogyamaiśvaryaṃ yaccānyadapi vāñchitam |
stotrasyāsya jape tiṣṭhaṃstatsarvaṃ labhate naraḥ ||
asaṃpūjya śivaṃ stotrajapāt phalamudāhṛtam |
saṃpūjya ca jape tasya phalaṃ vaktuṃ na śakyate ||
tasmānnabhasi saṃpūjya devadevaṃ sahomayā |
kṛtāñjalipuṭastiṣṭhan stotrametadudīrayet ||

|| iti śaive mahāpurāṇe saptamyāṃ vāyavīyasaṃhitāyāmuttarabhāge śivamahāstotram ||

www.kamakotimandali.com